# अथ पातञ्जलयोगसूत्रपाठः
# atha pātañjalayogasūtrapāṭhaḥ

## अथ समाधिपादः
## atha samādhipādaḥ

अथ योगानुशासनम्। १॥
1. atha yogānuśāsanam

योगश्चित्तवृत्तिनिरोधः। २॥
2. yogaścittavṛttinirodhaḥ

तदा द्रष्टुः स्वरूपेऽवस्थानम्। ३॥
3. tadā draṣṭuḥ svarūpe 'vasthānam

वृत्तिसारूप्यमितरत्र। ४॥
4. vṛttisārūpyamitaratra

वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः। ५॥
5. vṛttayaḥ pañcatayyaḥ kliṣṭākliṣṭāḥ

प्रमाणविपर्ययविकल्पनिद्रास्मृतयः। ६॥
6. pramāṇaviparyayavikalpanidrāsmṛtayaḥ

प्रत्यक्षानुमानागमाः प्रमाणानि। ७॥
7. pratyakṣānumānāgamāḥ pramāṇāni

विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्। ८॥
8. viparyayo mithyājñānamatadrūpapratiṣṭham

शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः। ९॥
9. śabdajñānānupātī vastuśūnyo vikalpaḥ

अभावप्रत्ययालम्बना वृत्तिर्निद्रा। १०॥
10. abhāvapratyayālambanā vṛttirnidrā

अनुभूतविषयासंप्रमोषः स्मृतिः। ११॥
11. anubhūtaviṣayāsaṃpramoṣaḥ smṛtiḥ

अभ्यासवैराग्याभ्यां तन्निरोधः। १२॥
12. abhyāsavairāgyābhyāṃ tannirodhaḥ

तत्र स्थितौ यत्नोऽभ्यासः। १३॥

13. tatra sthitau yatno 'bhyāsaḥ

स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः। १४॥

14. sa tu dīrghakālanairantaryasatkārāsevito dṛḍhabhūmiḥ

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्। १५॥

15. dṛṣṭānuśravikaviṣayavitṛṣṇasya vaśīkārasaṃjñā vairāgyam

तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्। १६॥

16. tatparaṃ puruṣakhyāterguṇavaitṛṣṇyam

वितर्कविचारानन्दास्मितारूपानुगमात् संप्रज्ञातः। १७॥

17. vitarkavicārānandāsmitārūpānugamāt saṃprajñātaḥ

विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः। १८॥

18. virāmapratyayābhyāsapūrvaḥ saṃskāraśeṣo 'nyaḥ

भवप्रत्ययो विदेहप्रकृतिलयानाम्। १९॥

19. bhavapratyayo videhaprakṛtilayānām

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्। २०॥

20. śraddhāvīryasmṛtisamādhiprajñāpūrvaka itareṣām

तीव्रसंवेगानामासन्नः। २१॥

21. tīvrasaṃvegānāmāsannaḥ

मृदुमध्याधिमात्रत्वात् ततोऽपि विशेषः। २२॥

22. mṛdumadhyādhimātratvāt tato 'pi viśeṣaḥ

ईश्वरप्रणिधानाद्वा। २३॥

23. īśvarapraṇidhānādvā

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः। २४॥

24. kleśakarmavipākāśayairaparāmṛṣṭaḥ puruṣaviśeṣa īśvaraḥ

तत्र निरतिशयं सर्वज्ञबीजम्। २५॥

25. tatra niratiśayaṃ sarvajñabījam

स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात्। २६॥

26. sa eṣa pūrveṣāmapi guruḥ kālenānavacchedāt

तस्य वाचकः प्रणवः । २७॥
27. tasya vācakaḥ praṇavaḥ

तज्जपस्तदर्थभावनम्। २८॥
28. tajjapastadarthabhāvanam

ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च। २९॥
29. tataḥ pratyakcetanādhigamo'pyantarāyābhāvaśca

व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः । ३०॥
30. vyādhistyānasaṃśayapramādālasyāviratibhrāntidarśanālabdhabhūmikatvānavasthitatvāni cittavikṣepāste'ntarāyāḥ

दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः । ३१॥
31. duḥkhadaurmanasyāṅgamejayatvaśvāsapraśvāsā vikṣepasahabhuvaḥ

तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः । ३२॥
32. tatpratiṣedhārthamekatattvābhyāsaḥ

मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्। ३३॥
33. maitrīkaruṇāmuditopekṣāṇāṃ sukhaduḥkhapuṇyāpuṇyaviṣayāṇāṃ bhāvanātaścittaprasādanam

प्रच्छर्दनविधारणाभ्यां वा प्राणस्य। ३४॥
34. pracchardanavidhāraṇābhyāṃ vā prāṇasya

विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी। ३५॥
35. viṣayavatī vā pravṛttirutpannā manasaḥ sthitinibandhanī

विशोका वा ज्योतिष्मती। ३६॥
36. viśokā vā jyotiṣmatī

वीतरागविषयं वा चित्तम्। ३७॥
37. vītarāgaviṣayaṃ vā cittam

स्वप्ननिद्राज्ञानालम्बनं वा। ३८॥
38. svapnanidrājñānālambanaṃ vā

यथाभिमतध्यानाद्वा। ३९॥
39. yathābhimatadhyānādvā

परमाणुपरममहत्त्वान्तोऽस्य वशीकारः। ४०॥
40. paramāṇuparamamahattvānto'sya vaśīkāraḥ

क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः। ४१॥
41. kṣīṇavṛtterabhijātasyeva maṇergrahītṛgrahaṇagrāhyeṣu tatsthatadañjanatā samāpattiḥ

तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः। ४२॥
42. tatra śabdārthajñānavikalpaiḥ saṅkīrṇā savitarkā samāpattiḥ

स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का। ४३॥
43. smṛtipariśuddhau svarūpaśūnyevārthamātranirbhāsā nirvitarkā

एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता। ४४॥
44. etayaiva savicārā nirvicārā ca sūkṣmaviṣayā vyākhyātā

सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम्। ४५॥
45. sūkṣmaviṣayatvaṃ cāliṅgaparyavasānam

ता एव सबीजः समाधिः। ४६॥
46. tā eva sabījaḥ samādhiḥ

निर्विचारवैशारद्येऽध्यात्मप्रसादः। ४७॥
47. nirvicāravaiśāradye'dhyātmaprasādaḥ

ऋतंभरा तत्र प्रज्ञा। ४८॥
48. ṛtaṃbharā tatra prajñā

श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात्। ४९॥
49. śrutānumānaprajñābhyāmanyaviṣayā viśeṣārthatvāt

तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी। ५०॥
50. tajjaḥ saṃskāro'nyasaṃskārapratibandhī

तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः। ५१॥
51. tasyāpi nirodhe sarvanirodhānnirbījaḥ samādhiḥ

इति समाधिपादः
iti samādhipādaḥ

## अथ साधनपादः
**atha sādhanapādaḥ**

तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः । १ ॥
1. tapaḥsvādhyāyeśvarapraṇidhānāni kriyāyogaḥ

समाधिभावनार्थः क्लेशतनूकरणार्थश्च । २ ॥
2. samādhibhāvanārthaḥ kleśatanūkaraṇārthaśca

अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः । ३ ॥
3. avidyāsmitārāgadveṣābhiniveśāḥ kleśāḥ

अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम् । ४ ॥
4. avidyā kṣetramuttareṣāṃ prasuptatanuvicchinnodārāṇām

अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या । ५ ॥
5. anityāśuciduḥkhānātmasu nityaśucisukhātmakhyātiravidyā

दृग्दर्शनशक्त्योरेकात्मतेवास्मिता । ६ ॥
6. dṛgdarśanaśaktyorekātmatevāsmitā

सुखानुशयी रागः । ७ ॥
7. sukhānuśayī rāgaḥ

दुःखानुशयी द्वेषः । ८ ॥
8. duḥkhānuśayī dveṣaḥ

स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः । ९ ॥
9. svarasavāhī viduṣo'pi tathārūḍho'bhiniveśaḥ

ते प्रतिप्रसवहेयाः सूक्ष्माः । १० ॥
10. te pratiprasavaheyāḥ sūkṣmāḥ

ध्यानहेयास्तद्वृत्तयः । ११ ॥
11. dhyānaheyāstadvṛttayaḥ

क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः । १२ ॥
12. kleśamūlaḥ karmāśayo dṛṣṭādṛṣṭajanmavedanīyaḥ

सति मूले तद्विपाको जात्यायुर्भोगाः । १३ ॥
13. sati mūle tadvipāko jātyāyurbhogāḥ

ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्। १४॥
14. te hlādaparitāpaphalāḥ puṇyāpuṇyahetutvāt

परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः। १५॥
15. pariṇāmatāpasaṃskāraduḥkhairguṇavṛttivirodhācca duḥkhameva sarvaṃ vivekinaḥ

हेयं दुःखमनागतम्। १६॥
16. heyaṃ duḥkhamanāgatam

द्रष्टृदृश्ययोः संयोगो हेयहेतुः। १७॥
17. draṣṭṛdṛśyayoḥ saṃyogo heyahetuḥ

प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्। १८॥
18. prakāśakriyāsthitiśīlaṃ bhūtendriyātmakaṃ bhogāpavargārthaṃ dṛśyam

विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि। १९।
19. viśeṣāviśeṣaliṅgamātrāliṅgāni guṇaparvāṇi

द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः। २०॥
20. draṣṭā dṛśimātraḥ śuddho'pi pratyayānupaśyaḥ

तदर्थ एव दृश्यस्यात्मा। २१॥
21. tadartha eva dṛśyasyātmā

कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात्। २२॥
22. kṛtārthaṃ prati naṣṭamapyanaṣṭaṃ tadanyasādhāraṇatvāt

स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः। २३॥
23. svasvāmiśaktyoḥ svarūpopalabdhihetuḥ saṃyogaḥ

तस्य हेतुरविद्या। २४॥
24. tasya heturavidyā

तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यम्। २५॥
25. tadabhāvāt saṃyogābhāvo hānaṃ taddṛśeḥ kaivalyam

विवेकख्यातिरविप्लवा हानोपायः। २६॥
26. vivekakhyātiraviplavā hānopāyaḥ

तस्य सप्तधा प्रान्तभूमिः प्रज्ञा। २७॥
27. tasya saptadhā prāntabhūmiḥ prajñā

योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः । २८ ॥
28. yogāṅgānuṣṭhānādaśuddhikṣaye jñānadīptirāvivekakhyāteḥ

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि। २९ ॥
29. yamaniyamāsanaprāṇāyāmapratyāhāradhāraṇādhyānasamādhayo 'ṣṭāvaṅgāni

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । ३० ॥
30. ahiṃsāsatyāsteyabrahmacaryāparigrahā yamāḥ

जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम्। ३१ ॥
31. jātideśakālasamayānavacchinnāḥ sārvabhaumā mahāvratam

शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः । ३२ ॥
32. śaucasantoṣatapaḥsvādhyāyeśvarapraṇidhānāni niyamāḥ

वितर्कबाधने प्रतिपक्षभावनम्। ३३ ॥
33. vitarkabādhane pratipakṣabhāvanam

वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका
मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम्। ३४ ॥
34. vitarkā hiṃsādayaḥ kṛtakāritānumoditā lobhakrodhamohapūrvakā
mṛdumadhyādhimātrā duḥkhājñānānantaphalā iti pratipakṣabhāvanam

अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः । ३५ ॥
35. ahiṃsāpratiṣṭhāyāṃ tatsannidhau vairatyāgaḥ

सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्। ३६ ॥
36. satyapratiṣṭhāyāṃ kriyāphalāśrayatvam

अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्। ३७ ॥
37. asteyapratiṣṭhāyāṃ sarvaratnopasthānam

ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः । ३८ ॥
38. brahmacaryapratiṣṭhāyāṃ vīryalābhaḥ

अपरिग्रहस्थैर्ये जन्मकथंतासंबोधः । ३९ ॥
39. aparigrahasthairye janmakathaṃtāsaṃbodhaḥ

शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः । ४० ॥
40. śaucāt svāṅgajugupsā parairasaṃsargaḥ

सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च। ४१॥
41. sattvaśuddhisaumanasyaikāgryendriyajayātmadarśanayogyatvāni ca

सन्तोषादनुत्तमः सुखलाभः। ४२॥
42. santoṣādanuttamaḥ sukhalābhaḥ

कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः। ४३॥
43. kāyendriyasiddhiraśuddhikṣayāttapasaḥ

स्वाध्यायादिष्टदेवतासंप्रयोगः। ४४॥
44. svādhyāyādiṣṭadevatāsaṃprayogaḥ

समाधिसिद्धिरीश्वरप्रणिधानात्। ४५॥
45. samādhisiddhirīśvarapraṇidhānāt

स्थिरसुखमासनम्। ४६॥
46. sthirasukhamāsanam

प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्। ४७॥
47. prayatnaśaithilyānantasamāpattibhyām

ततो द्वन्द्वानभिघातः। ४८॥
48. tato dvandvānabhighātaḥ

तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः। ४९॥
49. tasminsati śvāsapraśvāsayorgativicchedaḥ prāṇāyāmaḥ

बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः। ५०॥
50. bāhyābhyantarastambhavṛttirdeśakālasaṃkhyābhiḥ paridṛṣṭo dīrghasūkṣmaḥ

बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः। ५१॥
51. bāhyābhyantaraviṣayākṣepī caturthaḥ

ततः क्षीयते प्रकाशावरणम्। ५२॥
52. tataḥ kṣīyate prakāśāvaraṇam

धारणासु च योग्यता मनसः। ५३॥
53. dhāraṇāsu ca yogyatā manasaḥ

स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः। ५४॥
54. svaviṣayāsaṃprayoge cittasya svarūpānukāra ivendriyāṇāṃ pratyāhāraḥ

ततः परमा वश्यतेन्द्रियाणाम्। ५५॥
55. tataḥ paramā vaśyatendriyāṇām

इति साधनपादः
iti sādhanapādaḥ

## अथ विभूतिपादः
**atha vibhūtipādaḥ**

देशबन्धश्चित्तस्य धारणा। १॥
1. deśabandhaścittasya dhāraṇā

तत्र प्रत्ययैकतानता ध्यानम्। २॥
2. tatra pratyayaikatānatā dhyānam

तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः। ३॥
3. tadevārthamātranirbhāsaṃ svarūpaśūnyamiva samādhiḥ

त्रयमेकत्र संयमः। ४॥
4. trayamekatra saṃyamaḥ

तज्जयात् प्रज्ञालोकः। ५॥
5. tajjayāt prajñālokaḥ

तस्य भूमिषु विनियोगः। ६॥
6. tasya bhūmiṣu viniyogaḥ

त्रयमन्तरङ्गं पूर्वेभ्यः। ७॥
7. trayamantaraṅgaṃ pūrvebhyaḥ

तदपि बहिरङ्गं निर्बीजस्य। ८॥
8. tadapi bahiraṅgaṃ nirbījasya

व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः। ९॥
9. vyutthānanirodhasaṃskārayorabhibhavaprādurbhāvau nirodhakṣaṇacittānvayo nirodhapariṇāmaḥ

तस्य प्रशान्तवाहिता संस्कारात्। १०॥
10. tasya praśāntavāhitā saṃskārāt

सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः। ११॥
11. sarvārthataikāgratayoḥ kṣayodayau cittasya samādhipariṇāmaḥ

ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः। १२॥
12. tataḥ punaḥ śāntoditau tulyapratyayau cittasyaikāgratāpariṇāmaḥ

एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः। १३॥
13. etena bhūtendriyeṣu dharmalakṣaṇāvasthāpariṇāmā vyākhyātāḥ

शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी। १४॥
14. śāntoditāvyapadeśyadharmānupātī dharmī

क्रमान्यत्वं परिणामान्यत्वे हेतुः। १५॥
15. kramānyatvaṃ pariṇāmānyatve hetuḥ

परिणामत्रयसंयमादतीतानागतज्ञानम्। १६॥
16. pariṇāmatrayasaṃyamādatītānāgatajñānam

शब्दार्थप्रत्ययानामितरेतराध्यासात् सङ्करस्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम्। १७॥
17. śabdārthapratyayānāmitaretarādhyāsāt saṅkarastatpravibhāgasaṃyamāt sarvabhūtarutajñānam

संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम्। १८॥
18. saṃskārasākṣātkaraṇāt pūrvajātijñānam

प्रत्ययस्य परचित्तज्ञानम्। १९॥
19. pratyayasya paracittajñānam

न च तत्सालम्बनं तस्याविषयीभूतत्वात्। २०॥
20. na ca tatsālambanaṃ tasyāviṣayībhūtatvāt

कायरूपसंयमात् तद्ग्राह्यशक्तिस्तम्भे चक्षुष्प्रकाशासंप्रयोगेऽन्तर्धानम्। २१॥
21. kāyarūpasaṃyamāt tadgrāhyaśaktistambhe cakṣuṣprakāśāsaṃprayoge'ntardhānam

एतेन शब्दाद्यन्तर्धानमुक्तम्। २२॥
22. etena śabdādyantardhānamuktam

सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा। २३॥
23. sopakramaṃ nirupakramaṃ ca karma tatsaṃyamādaparāntajñānamariṣṭebhyo vā

मैत्र्यादिषु बलानि। २४॥
24. maitryādiṣu balāni

बलेषु हस्तिबलादीनि। २५॥
25. baleṣu hastibalādīni

प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्। २६॥
26. pravṛttyālokanyāsāt sūkṣmavyavahitaviprakṛṣṭajñānam

भुवनज्ञानं सूर्ये संयमात्। २७॥
27. bhuvanajñānaṃ sūrye saṃyamāt

चन्द्रे ताराव्यूहज्ञानम्। २८॥
28. candre tārāvyūhajñānam

ध्रुवे तद्गतिज्ञानम्। २९॥
29. dhruve tadgatijñānam

नाभिचक्रे कायव्यूहज्ञानम्। ३०॥
30. nābhicakre kāyavyūhajñānam

कण्ठकूपे क्षुत्पिपासानिवृत्तिः। ३१॥
31. kaṇṭhakūpe kṣutpipāsānivṛttiḥ

कूर्मनाड्यां स्थैर्यम्। ३२॥
32. kūrmanāḍyāṃ sthairyam

मूर्धज्योतिषि सिद्धदर्शनम्। ३३॥
33. mūrdhajyotiṣi siddhadarśanam

प्रातिभाद्वा सर्वम्। ३४॥
34. prātibhādvā sarvam

हृदये चित्तसंवित्। ३५॥
35. hṛdaye cittasaṃvit

सत्त्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात्
स्वार्थसंयमात् पुरुषज्ञानम्। ३६॥
36. sattvapuruṣayoratyantāsaṅkīrṇayoḥ pratyayāviśeṣo bhogaḥ parārthatvāt svārthasaṃyamāt puruṣajñānam

ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते। ३७॥
37. tataḥ prātibhaśrāvaṇavedanādarśāsvādavārtā jāyante

ते समाधावुपसर्गा व्युत्थाने सिद्धयः। ३८॥
38. te samādhāvupasargā vyutthāne siddhayaḥ

बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः। ३९॥
39. bandhakāraṇaśaithilyāt pracārasaṃvedanācca cittasya paraśarīrāveśaḥ

उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च। ४०॥
40. udānajayājjalapaṅkakaṇṭakādiṣvasaṅga utkrāntiśca

समानजयाज्ज्वलनम्। ४१॥
41. samānajayājjvalanam

श्रोत्राकाशयोः संबन्धसंयमाद्दिव्यं श्रोत्रम्। ४२॥
42. śrotrākāśayoḥ saṃbandhasaṃyamāddivyaṃ śrotram

कायाकाशयोः संबन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम्। ४३॥
43. kāyākāśayoḥ saṃbandhasaṃyamāllaghutūlasamāpatteścākāśagamanam

बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः। ४४॥
44. bahirakalpitā vṛttirmahāvidehā tataḥ prakāśāvaraṇakṣayaḥ

स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः। ४५॥
45. sthūlasvarūpasūkṣmānvayārthavattvasaṃyamādbhūtajayaḥ

ततोऽणिमादिप्रादुर्भावः कायसंपत् तद्धर्मानभिघातश्च। ४६॥
46. tato'ṇimādiprādurbhāvaḥ kāyasaṃpat taddharmānabhighātaśca

रूपलावण्यबलवज्रसंहननत्वानि कायसंपत्। ४७॥
47. rūpalāvaṇyabalavajrasaṃhananatvāni kāyasaṃpat

ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः। ४८॥
48. grahaṇasvarūpāsmitānvayārthavattvasaṃyamādindriyajayaḥ

ततो मनोजवित्वं विकरणभावः प्रधानजयश्च। ४९॥
49. tato manojavitvaṃ vikaraṇabhāvaḥ pradhānajayaśca

सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च। ५०॥
50. sattvapuruṣānyatākhyātimātrasya sarvabhāvādhiṣṭhātṛtvaṃ sarvajñātṛtvaṃ ca

तद्वैराग्यादपि दोषबीजक्षये कैवल्यम्। ५१॥
51. tadvairāgyādapi doṣabījakṣaye kaivalyam

स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्। ५२॥
52. sthānyupanimantraṇe saṅgasmayākaraṇaṃ punaraniṣṭaprasaṅgāt

क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम्। ५३॥
53. kṣaṇatatkramayoḥ saṃyamādvivekajaṃ jñānam

जातिलक्षणदेशैरन्यतानवच्छेदात् तुल्ययोस्ततः प्रतिपत्तिः। ५४॥
54. jātilakṣaṇadeśairanyatānavacchedāt tulyayostataḥ pratipattiḥ

तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम्। ५५॥
55. tārakaṃ sarvaviṣayaṃ sarvathāviṣayamakramaṃ ceti vivekajaṃ jñānam

सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति। ५६॥
56. sattvapuruṣayoḥ śuddhisāmye kaivalyamiti

इति विभूतिपादः
iti vibhūtipādaḥ

## अथ कैवल्यपादः

**atha kaivalyapādaḥ**

जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः। १॥

1. janmauṣadhimantratapaḥsamādhijāḥ siddhayaḥ

जात्यन्तरपरिणामः प्रकृत्यापूरात्। २॥

2. jātyantarapariṇāmaḥ prakṛtyāpūrāt

निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्। ३॥

3. nimittamaprayojakaṃ prakṛtīnāṃ varaṇabhedastu tataḥ kṣetrikavat

निर्माणचित्तान्यस्मितामात्रात्। ४॥

4. nirmāṇacittānyasmitāmātrāt

प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम्। ५॥

5. pravṛttibhede prayojakaṃ cittamekamanekeṣām

तत्र ध्यानजमनाशयम्। ६॥

6. tatra dhyānajamanāśayam

कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्। ७॥

7. karmāśuklākṛṣṇaṃ yoginastrividhamitareṣām

ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम्। ८॥

8. tatastadvipākānuguṇānāmevābhivyaktirvāsanānām

जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात्। ९॥

9. jātideśakālavyavahitānāmapyānantaryaṃ smṛtisaṃskārayorekarūpatvāt

तासामनादित्वं चाशिषो नित्यत्वात्। १०॥

10. tāsāmanāditvaṃ cāśiṣo nityatvāt

हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः। ११॥

11. hetuphalāśrayālambanaiḥ saṃgṛhītatvādeṣāmabhāve tadabhāvaḥ

अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम्। १२॥

12. atītānāgataṃ svarūpato'styadhvabhedāddharmāṇām

ते व्यक्तसूक्ष्मा गुणात्मानः। १३॥

13. te vyaktasūkṣmā guṇātmānaḥ

परिणामैकत्वाद्वस्तुतत्त्वम्। १४॥
14. pariṇāmaikatvādvastutattvam

वस्तुसाम्ये चित्तभेदात् तयोर्विभक्तः पन्थाः। १५॥
15. vastusāmye cittabhedāt tayorvibhaktaḥ panthāḥ

न चैकचित्ततन्त्रं चेद्वस्तु तदप्रमाणकं तदा किं स्यात्। १६॥
16. na caikacittatantraṃ cedvastu tadapramāṇakaṃ tadā kiṃ syāt

तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम्। १७॥
17. taduparāgāpekṣitvāccittasya vastu jñātājñātam

सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात्। १८॥
18. sadā jñātāścittavṛttayastatprabhoḥ puruṣasyāpariṇāmitvāt

न तत् स्वाभासं दृश्यत्वात्। १९॥
19. na tat svābhāsaṃ dṛśyatvāt

एकसमये चोभयानवधारणम्। २०॥
20. ekasamaye cobhayānavadhāraṇam

चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसङ्करश्च। २१॥
21. cittāntaradṛśye buddhibuddheratiprasaṅgaḥ smṛtisaṅkaraśca

चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम्। २२॥
22. citerapratisaṃkramāyāstadākārāpattau svabuddhisaṃvedanam

द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम्। २३॥
23. draṣṭṛdṛśyoparaktaṃ cittaṃ sarvārtham

तदसंख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात्। २४॥
24. tadasaṃkhyeyavāsanābhiścitramapi parārthaṃ saṃhatyakāritvāt

विशेषदर्शिन आत्मभावभावनानिवृत्तिः। २५॥
25. viśeṣadarśina ātmabhāvabhāvanānivṛttiḥ

तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम्। २६॥
26. tadā vivekanimnaṃ kaivalyaprāgbhāraṃ cittam

तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः। २७॥
27. tacchidreṣu pratyayāntarāṇi saṃskārebhyaḥ

हानमेषां क्लेशवदुक्तम्। २८॥
28. hānameṣāṃ kleśavaduktam

प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः। २९॥
29. prasaṃkhyāne'pyakusīdasya sarvathā vivekakhyāterdharmameghaḥ samādhiḥ

ततः क्लेशकर्मनिवृत्तिः। ३०॥
30. tataḥ kleśakarmanivṛttiḥ

तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्याज्ज्ञेयमल्पम्। ३१॥
31. tadā sarvāvaraṇamalāpetasya jñānasyānantyājjñeyamalpam

ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम्। ३२॥
32. tataḥ kṛtārthānāṃ pariṇāmakramasamāptirguṇānām

क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः। ३३॥
33. kṣaṇapratiyogī pariṇāmāparāntanirgrāhyaḥ kramaḥ

पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति। ३४॥
34. puruṣārthaśūnyānāṃ guṇānāṃ pratiprasavaḥ kaivalyaṃ svarūpapratiṣṭhā vā citiśaktiriti

इति कैवल्यपादः
iti kaivalyapādaḥ

इति श्रीमत्पतञ्जलिमहामुनिप्रणीतयोगसूत्रपाठः
iti śrīmatpatañjalimahāmunipraṇītayogasūtrapāṭhaḥ